# Shri Saradananda Stotram

# શ્રીસારદાનન્દસ્તોત્રમ્

## Document Information

Text title : Shri Saradananda Stotram

File name : sAradAnandastotram.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kumudaranjana Goswami

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીસારદાનન્દસ્તોત્રમ્

વ્યાસકલ્પં મહાત્માનં હિમાદ્રિસ્નિગ્ધ ગમ્ભીરમ્ ।
તં નૌમિ સારદાનન્દં ધૈર્યશીલં ક્ષમાન્વિતમ્ ॥ ૧॥

સર્વાસુ નારીરૂપેષુ "પશ્યાત્ર જગદમ્બિકામ્" ।
ઇત્યેવં ઘોષયન્તં તં માતૃમૂર્તિદૃશં નમઃ ॥ ૨॥

કૃત્સ્નં સઙ્ઘં ધારયન્તં વાસુકિમિવ મૂર્ધનિ ।
પ્રકાશયન્તં નિત્યં ચ લીલાગ્રન્થં જનેષુ વૈ ॥ ૩॥

પરિવેશ્ય તુ તલ્લીલાં જનેષૂચ્ચાવચેષુ ચ ।
આનન્દયન્તં ભક્તાંસ્તાન્ ભગવત્પ્રેમવિગ્રહામ્ ॥ ૪॥

પૂરયન્તં ચ ભક્તાનાં ભક્તિતૃષ્ણાં સુદુર્લભામ્ ।
તં વન્દે સારદાનન્દં શારદામાતૃસેવકમ્ ॥ ૫॥

જ્ઞાનયોગસ્ય યોગસ્ય ભક્તિયોગસ્ય કર્મણામ્ ।
મૂર્તં વિગ્રહરૂપં તં નમામિ શ્રેષ્ઠપૂરુષમ્ ॥ ૬॥

કરુણાસિન્ધુરૂપં તં સર્વાનન્દવિવર્ધનમ્ ।
તં નૌમિ સારદાનન્દં સ્વામિનં ભક્તિભાવતઃ ॥ ૭॥

સારદાનન્દદેવં યે સ્મરન્તિ શ્રદ્ધયાન્વિતાઃ ।
પ્રાપ્નુવન્ત્યેવ તે મુક્તિં કરામલકવચ્છુભામ્ ॥ ૮॥

ઇતિ અધ્યાપકપણ્ડિતશ્રીકુમુદરઞ્જનગોસ્વામીતર્કવેદાન્તતીર્થવિરચિતં
"શ્રીમત્સારદાનન્દસ્તોત્રમ્" સમ્પૂર્ણમ્ ।

પ્રણામમન્ત્રઃ-
સારદાયાઃ પદાબ્જે વૈ નિત્યં યો ભ્રમરાયતે ।
નમોસ્તુ સારદાનન્દ સ્વામિને જ્ઞાનદાયિને ॥

Proofread by Aruna Narayanan

*Shri Saradananda Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*